# विवेकानन्दस्वामिनां नारीकल्याणचिन्ता

उत्तमघोषः*

"स्त्रीपुरुषयोर्व्युत्क्रमे दोषः समः शास्त्रे प्रतिष्ठितः।
नरा न तमवेक्षन्ते तेनात्र वरमङ्गनाः॥" इति मनुः।

वयं यदि कस्यापि देशस्य उन्नतिं द्रष्टुकामास्तदानीं तस्य देशस्य नार्यः कथं सन्तीति द्रष्टव्यम्। विविधवर्णवर्णितानां मेघं स्प्रष्टुकामानां चन्द्रचुम्बिनीनामट्टालिकानां सत्त्वेऽपि यदि नार्यस्तत्र वञ्चिताः शोषिता अवमानितास्तदा देशस्य सामग्रिकोन्नयनं न जातमिति निश्चप्रचम्। "There is no chance for the welfare of the world unless the condition of women is improved." (V7. p.214-15)

अस्माकं समाजे स्त्रीपुरुषौ परस्परं परिपूरकौ। पुरुषा यथा कठोरपरिश्रमे दक्षास्तथा नार्यः अपि गृहसज्जीकरणे सन्तानपरिपालने च श्रेष्ठाः। न हि एकस्य स्थानमपरेण परिपूरयितुं शक्यते, पुरुषाः किं मातृवत्स्नेहेन सन्तानं परिपालयितुं शक्नुयुः? नैव, अतः उभौ एव स्वस्वक्षेत्रे अनन्यौ।

स्त्रीपुरुषयोः उत्पत्तौ अपि वैषम्यं नास्ति। उच्यते यत् प्रजापतिः स्वदेहस्य अर्धभागेन पुरुषमर्धेन च स्त्रियं व्यासृजत्। उक्तञ्च मनुना—

"द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत्।
अर्धेन नारी तस्यां स विराजमसृजत्प्रभुः।" इति॥

अतस्तयोः समप्राधान्यम्। परन्तु अस्माकं समाजे अद्य नार्यः पुरुषैर्दलिता अवहेलिता वञ्चिताश्च दृश्यन्ते। अहो आश्चर्यम् अद्य तु सन्तानजन्मनः प्राक्

* शोधच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।

भ्रूणपरीक्षणमपि क्रियते किं पुत्रो भविता उत कन्या, यदि पुत्रः स्यात्तदा गृह्णाति, कन्या चेत्क्वचिद् भ्रूणमेव हन्ति,—एतादृशमतिनिन्दितम् अतिकदर्यं कार्यमद्यापि अस्माकं देशे प्रचलति। किं ते न जानन्ति यत् केवलं पुरुषेणायं प्रपञ्चो न प्रपञ्चितो नापि अग्रेसरः,—"एकेन चक्रेण न रथस्य गतिर्भवेत्।"। एवं पुरुषम्मन्यमानास्ते अपि कस्याश्चिन्मातुरेव गर्भात्प्रसृताः। वस्तुतस्तु स्त्रीपुरुषयोः भेद एव नास्ति। यथा मृत्तिकानिर्मितमेव कदापि घटरूपेण कदापि कलसरूपेण वा व्यवह्रियते, घटकलसाद्युपाधिवर्जने तु मृत्तिका एवावशिष्यते। एवं नारीपुरुषाणां केवलमुपाधौ आकारे च भेदः शुद्धब्रह्मणि तु तयोः भेद एव नास्ति। आम्नातञ्च श्वेताश्वतरोपनिषदि—"त्वं स्त्री पुमानसि त्वं कुमार उत वा कुमारी।" इति॥

प्राचीनकालेऽपि किं नारीणामेतादृशी दुर्दशा आसीद् इति चेत् स्वामिनये नैव, तदा तु विदेहराज्ञो जनकस्य अधिमञ्चं प्रज्ञापारावारपारङ्गता गार्गी कुशलधनुर्धरहस्तस्थितसुतीक्ष्णवाणान् इव स्वप्रश्नान् उत्थापयन् निखिलागमनिष्णातं तर्काजेयं युक्तिविशेषविशदं याज्ञवल्क्यमपि तर्कयुद्धे आह्वयाञ्चकार। रामायणे हृतसीतः रामः यज्ञकरणेऽनधिकारी सञ्जातः, स्वस्त्रियाः सीतायाः प्रतिमूर्तिं निर्माय तत्र प्राणदानानन्तरमेव तस्य यज्ञः समारब्धः। तर्हि कदा आरभ्य नारीणामेषा दुर्दशा सञ्जाता इति चेत् स्वामिनये यदा केचन असंस्कृतब्राह्मणा अस्माकं समाजस्य नियन्तारः सञ्जाताः तत आरभ्य तेषां सारहीनैः कपोलकल्पितैर्नियमैः नारीणां मन्दिरगमनाद्यधिकारा अपहृताः। सतीदाहबाल्यविवाहादिभिः नार्यो जर्जरिताः पाशाभावेऽपि पाशैर्बद्धा इव। तैरेव असारैः नियमांशैरद्यापि वयं प्रचलिता अन्धेनैव नीयमाना यथान्धाः, दृश्यते च महाराष्ट्रस्य केषुचिन्मन्दिरेषु अद्यापि नारीणां प्रवेशो नास्ति।

अमेरिकादेशे भाषणकाले एकदा स्वामिवर्या उक्तवन्तः यत्—"There is no chance for the welfare of the world unless the condition

of the women is improved. It Is Not Possible for a Bird to Fly on Only One Wing." इति। नारीणामुन्नतिं विना विश्वोन्नतिः नैव इत्यर्थः।

नारीणामुन्नतिविषये स्वामिनः प्रथममभिमतं भवति शिक्षा। नारीणां समस्याः वयं पुरुषास्तथा नावगच्छामो यथा नार्योऽवगच्छेयुः। अतोऽस्माभिः ताभ्यो यथार्थशिक्षा प्रदेया। इतिहासपुराणविज्ञानपुराणादिभिः सह लौकिकानां सीवनरन्धनादीनामपि शिक्षा प्रदेया। एवं क्रमेण सर्वथार्जितमतयः सुशिक्षिताः ताः स्वयमेव स्वसमस्याः समाधास्यन्ति। अतो मद्रासप्रदेशे भाषणकाले स्वामिनोक्तम्—"Educate your women first and leave them to themselves; then they will tell you what reforms are necessary for them. In matters concerning them, who are you?" नारीणां समस्याः पुरुषा एव समाधातुं प्रयतन्ते, तासां भागधेयं पुरुषा एव निर्मातुमिच्छन्तीत्येव सर्वसमस्याया मूलमिति क्यालिफोर्नियाप्रदेशे भाषणकाले स्पष्टीकृतम्—"Women will work out their own destinies—much better, too, than men can ever do for them. All the mischief to women has come because men undertook to shape the destiny of women." एतदर्थं स्वामिविवेकानन्दो भगिनीनिवेदितां नियुक्तवान्। भगिनीनिवेदिता च कोलकातायामेकं बालिकाविद्यालयं निर्मितवती। पुनश्च तस्मिन् काले या बालिका विद्यालयं गच्छन्ति तासां विवाह आसीत् दुर्लभः। अतः भगिनी निवेदिता गृहं गृहं गत्वा पितरौ बोधयित्वा बालिकासङ्ग्रहमकरोदित्यपि श्रूयते।

द्वितीयं भवति पूर्वगौरवस्मरणम्, अस्माकं नारीषु स्वजातौ विश्वासो नास्ति। यदा नारीणां विवादो भवति तदानीं यदि तत्र एका नारी समाधत्ते तदानीं ता न परितुष्यन्ति, यदि एकः पुरुषस्तत्र समाधत्ते तदा नार्यः परमसन्तोषं प्राप्नुवन्ति। नार्यो बोधनीया यत् ता न दुर्बलाः, प्राचीनकाले रानी

लक्ष्मीवाई तु एकेन ब्रिटिश्जनशोणितपिपासुना शताधिकजनपञ्चत्वप्रापकेण करकम्पितकृपाकृपणकृपाणेनैव स्वराज्यरक्षार्थम् अन्तिमशोणितपर्यन्तं ब्रिटिश्जनैः युयोध। मातङ्गिनी हाजारा अपि ब्रिटिश्जनानां गोलिकावर्षणेन क्षतविक्षता भूमौ पतिता, परन्तु राष्ट्रध्वजं न तत्याज। एवं पूर्वगौरवस्मरणेन यदास्माकं नार्यो दृढचेता निर्भयाः स्वतन्त्राश्च भविष्यन्ति तदा एव तासामुन्नतिः सम्भवति, अन्यथा नैव।

तृतीयं भवति पवित्रता। नार्यैः सर्वदैव पवित्रता स्वप्राणैरपि रक्षणीया। विदेशेषु नार्यः भार्यारूपेण प्रसिद्धाः, परन्तु अस्माकं देशे मातृरूपेण। स्वदेशमन्त्रे स्वामिनोक्तं यद् अस्माकं नारीणामादर्शः भवति सीता सावित्री दमयन्तीति। पाश्चात्यविषये एवं श्रूयते यत् एका पत्नी पतिं प्रति कथयति यत् तव पुत्रः मम पुत्रश्च अस्माकं पुत्रेण कलहायते- एतस्य तात्पर्यं यत् पत्न्याः पत्युश्च अन्यत्रान्यत्र पुत्रो जात इति। परन्तु अस्माकं तथा नास्ति, अस्माकं नारीणामेकपतित्वं तु समग्रविश्वे समादृतम्। समग्रजीवने सीता स्वपतिं विना अन्यं कमपि पुरुषं नैवास्पृशत्। अस्माकन्नारीषु एवमेव पातिव्रत्यम् आवश्यकम्। अन्यथा “स्त्रीषु दुष्टासु जायते वर्णसङ्करः, सङ्करो नरकायैव“ इति। अस्माकं नारीणामादर्शाः सीता-सावित्री-दमयन्त्याद्याः इति स्वामिना स्वदेशमन्त्रे समुद्घोषितम्। विदेशेषु भारतीयनारीणामादर्शविषये क्वचित्तेनोक्तम्—“Every girl in India must aspire to be like Savitri, whose love could not be conquered by death, and who through this tremendous love snatched back from even Yama, the soul of her husband.” एतदर्थमेव स्वामिना स्त्रीमठः चिन्तितः। नदीनां जलधारा यदा एकत्रीक्रियते तदा एव तत्र महद्गतिरुत्पद्यते, तत्र च यन्त्रेण विद्युदुत्पादयितुं शक्यते। एवं मठे जपध्यानादिना ब्रह्मचर्यपालनेन यदा नारीणां विक्षेपशक्तयः एकत्र पूर्णतां यास्यन्ति तदा एव तच्छक्त्या कार्यं सिध्यति, तासामुन्नतिश्च जायते।

परन्तु अधुना नग्नता एवाधुनिकतायाः परिमापिका सञ्जाता। अत एव प्रतिदिनं नारीनिर्यातनं वर्धमानमेव दृश्यते। अतः अस्माभिः सङ्कल्पवद्भिः भवितव्यं यत् स्वामिना दर्शितं मार्गमनुसृत्य नारीणां समुन्नत्या भारतं देवभूमित्वेन प्रतिष्ठाप्य विश्वस्मिन् भारतं मूर्धन्यस्थानं प्रापयामो, यतो हि- यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता इति।



[बेलुडमठे स्वामिविवेकानन्दमन्दिरे स्वामिविवेकानन्दस्य चित्रम्]